हैमप्रभा (विज्ञसमीक्षित जर्नल)- अङ्क : २१, २०७९ पृ. १८३-१९५ ISSN : 2392-4764 (P)

# प्रत्यक्षोत्पत्तौ सन्निकर्षस्य हेतुत्वोपपादनम्

**रघुनाथनेपालः (विद्यावारिधिः)**
उपप्राध्यापको न्यायविभागे
नेपालसंस्कृतविश्वविद्यालयान्तर्गतस्य
विश्वविद्यालयविद्यापीठस्य, बेलझुन्डी, दाङ, नेपाल
Email : raghunathnepal2@gmail.com
*https://doi.org/10.3126/haimaprabha.v21i01.44863*

**सारसङ्क्षेपः**

*अस्मिन्नालेखे न्यायदर्शनोक्तस्य प्रत्यक्षज्ञानोत्पत्तिकारणीभूतस्य लौकिकालौकिकभेदभिन्नस्य सन्निकर्षस्य स्वरूपं परिशीलितमस्ति । न्यायदर्शने तत्समानतन्त्रभूते वैशेषिकदर्शने च प्रत्यक्षप्रमारूपं ज्ञानं तत्करणरूपं प्रत्यक्षप्रमाणञ्च सुविस्तृततया चिन्तितमस्ति । एतच्चिन्तनक्रमे नैयायिकैः प्रत्यक्षप्रमायाः जननार्थं संयोगादिषड्विधसन्निकर्षाणां योगजादिलक्षणरूपत्रिविधालौकिकसन्निकर्षाणाञ्च स्वरूपं चिन्तितमस्ति । सुविस्तृते महति न्यायशास्त्रे तत्समानभूते वैशेषिके च दर्शने अयं विषयो यत्र तत्र विचारितो वर्तते । किन्तु बहुत्र प्रसृतानां सन्निकर्षविषयकाणां विभिन्नाचार्योक्तविविधमतानामेकत्र संग्रहो नैवालोक्यते । कतिपयैरर्वाचीनैः विद्वद्भिः स्वरचितप्रकरणग्रन्थेष्वयं विषयः प्रत्यक्षप्रमाणविवेचनक्रमे प्रासङ्गिकतया प्रतिपादितमस्ति । किन्तु तत्रापि बहूनां विषयाणां समावेशात् विषयस्यैतन्मात्रस्य चिन्तनाभावाच्च जिज्ञासूनां मन्दमतीनां न्यायशास्त्रप्रविविक्षूणां बालानाञ्च एतत्स्वरूपनिर्धारणे क्लेशो जायते । अतः सन्निकर्षमात्रस्य स्वरूपं सोदाहरणं लक्षणञ्च परिशील्य अस्य प्रत्यक्षप्रमोत्पत्तौ कथमुपयोगित्वं वर्तत इति निर्धारणीयम्, तदर्थञ्चेदं लघ्वनुसन्धानकार्ये प्रवृत्तिः । एतच्चिन्तनक्रमे प्रासङ्गिकतया समागतानां प्रत्यक्षप्रमा-तत्करणीभूतप्रत्यक्षप्रमाणादीनां च स्वरूपं संक्षेपतः परिचाय्यतेऽत्र । प्रत्यक्षप्रमोत्पत्तौ संयोग-संयुक्तसमवाय-संयुक्तसमवेतसमवाय-समवाय-समवेतसमवाय-विशेषणविशेष्यभावरूपाणां षड्विधानां सन्निकर्षाणां तथैव क्वचित्सामान्यलक्षण-ज्ञानलक्षण-योगजरूपाणाञ्च त्रिविधानामलौकिकसन्निकर्षाणां चात्यन्तमुपयोगिता वर्तते, न तैर्विना प्रत्यक्षप्रमा जायते, न वा प्रत्यक्षप्रमाणस्य प्रमाणत्वञ्च सिद्ध्यति । एतदेवात्रालेखे विभिन्नानामाचार्याणां मतानि प्रदर्श्य तद्विवेचनपुरस्सरं स्वकीयया सरलया गिरा प्रत्यक्षप्रमोत्पत्तौ सन्निकर्षस्य हेतुत्वं वर्तत इत्येवं निष्कर्षः स्थापितो वर्तते । एतदर्थञ्च पुस्तकालयविधिमनुसृत्य लेखकमितिपद्धत्यनुसारेण विषयो निष्कृष्टो विद्यते । मन्येऽनेनानुसन्धानमूलकालेखेन सन्निकर्षविषयकयथार्थस्वरूपस्य ज्ञानार्थं समुत्सुकानां समेषां लाभो भवेदिति ।)*

**शब्दकुञ्जी**
प्रमाणम्, प्रत्यासत्तिः, सामान्यलक्षणा, ज्ञानलक्षणा, योगजः ।

## विषयपरिचयः

प्रमाणशास्त्रत्वेन प्रसिद्धं न्यायशास्त्रमस्ति । तच्च गौतमर्षिप्रवर्तितम् । पदार्थशास्त्रत्वेन च प्रवर्तितं वैशेषिकशास्त्रमस्ति । तच्च महर्षिकणादप्रवर्तितम् । तत्रमहर्षिगौतमेन पञ्चस्वध्यायेषु विभज्य सूत्राणि

रचितानि सन्ति । न्यायशास्त्रस्यास्य त्रिधा प्रवृत्तिर्दृश्यते । तदुक्तं भाष्यकारेण - "त्रिविधा चास्य शास्त्रस्य प्रवृत्तिः – उद्देशो लक्षणं परीक्षा चेति" (वात्स्यायनः, २०५४, पृ.१७) । एतदुक्तप्रकारेणैव सूत्रकारः "प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः" (न्यायसूत्रम्, १।१।१) इति सूत्रेण प्रमाणादीनां षोडशपदार्थानां समुद्देशमकरोत् । ततः प्रथमाध्यायस्याह्निकद्वये एषां विभागपुरस्सरं लक्षणान्युक्त्वा द्वितीयाध्यायात् पञ्चमाध्यायपर्यन्तं निरुक्तलक्षणानां परीक्षणं सुविस्तृतं कृतवान् । तत्र द्वितीयाध्यायस्याह्निकद्वये प्रत्यक्षादीनि चत्वारि प्रमाणानि परीक्षितानि । तृतीयाध्यायस्याह्निकद्वये चतुर्थाध्यायस्य प्रथमाह्निके च "आत्मशरीरेन्द्रियबुद्धिमनः-प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्" (न्यायसूत्रम्, १।१।९) इति सूत्रोक्तानि द्वादशप्रमेयाणि परीक्षितानि । ततश्चतुर्थाध्यायस्य द्वितीयाह्निके प्रसङ्गात् तत्त्वज्ञानोत्पत्तिप्रकारः प्रदर्शितः । पञ्चमाध्यायस्य प्रथमाह्निके साधर्म्यसमवैधर्म्यसमादिचतुर्विंशतिजातयो विभज्य परीक्षिताः । तत्रैव द्वितीयाह्निके तु प्रतिज्ञाहान्यादीनि द्वाविंशतिनिग्रहस्थानानि विभज्य परीक्षितानि सन्ति । गौतमोक्तसूत्राणामेषां विस्तृतं भाष्यं ऋषिकल्पो विद्वत्प्रवरो वात्स्यायनोऽकरोदिति तदीयभाष्यस्यान्तःस्थेन श्लोकेनैव ज्ञायते -

योऽक्षपादमृषिं न्यायः प्रत्यभाद्वदतां वरम् ।
तस्य वात्स्यायन इदं भाष्यजातमवर्तयत् ॥ (वात्स्यायनः, २०५४, पृ. ४५९)

गच्छति काले बौद्धाचार्यैः कुयुक्तिभिः सभाष्यं न्यायतन्त्रं खण्डितं, तदनन्तरं भारद्वाजोद्योतकरेण बौद्धोक्ताक्षेपनिवारणार्थं तद्भाष्योपरि वार्तिकं रचितम् । तदेतत् वार्तिककारस्य "कुतार्किकाज्ञाननिवृत्तिहेतुः करिष्यते तस्य मया निबन्धः" (उद्योतकरः, २०६४, पृ.१) इत्यादिवचनेनैव ज्ञायते । कालान्तरे पुनः बौद्धैः खण्डिते वार्तिके सर्वतन्त्रस्वतन्त्रः षड्दर्शनटीकाकारो वाचस्पतिमिश्रो वार्तिकतात्पर्यटीकां विरचय्य न्यायतन्त्रमुद्धृतवान्। तदुक्तं स्वग्रन्थारम्भे-

ग्रन्थव्याख्याच्छलेनैव निरस्ताखिलदूषणा ।
न्यायवार्तिकतात्पर्यटीकास्माभिर्विधास्यते ॥
इच्छामि किमपि पुण्यं दुस्तरकुनिबन्धनमग्नानाम् ।
उद्योतकरगवीनामतिजरतीनां समुद्धरणात् ॥ (सन् २०१३, पृ १) इति ।

तदुत्तरमपि खण्डिते तात्पर्यटीकासहिते न्यायतन्त्रे भगवदंशावतारभूतः श्रीमदुदयनाचार्यस्तात्पर्यपरिशुद्धिं विरचय्य पुनः गौतमीयन्यायदर्शनमिदं सुदृढं स्थापितवान् । तदेतत् सर्वमपि न्यायदर्शनेतिहासाध्ययनेन स्पष्टं ज्ञातुं शक्यते । प्राचीनकाले इदं न्यायशास्त्रं हेतुशास्त्रं, हेतुविद्या, आन्वीक्षिकी, तर्कविद्या, तर्कशास्त्रं, वादविद्या, न्यायविद्या, प्रमाणशास्त्रं, तर्कीत्यादि शब्दैः प्रचलितमासीदिति प्राचीनग्रन्थावलोकनेन ज्ञायते । तत्रापि 'आन्वीक्षिकी' इति नाम तु सुप्रसिद्धमासीत् । तदेव भाष्यकारेण वात्स्यायनेन आन्वीक्षिकीत्यस्य न्यायशास्त्रमेवार्थ इति स्पष्टमुक्तं स्वकीये भाष्ये- "प्रत्यक्षागमाश्रितमनुमानं सा अन्वीक्षा.प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षणमन्वीक्षा, तया प्रवर्तते इत्यान्वीक्षिकी न्यायविद्यान्यायशास्त्रमित्यर्थः"(वात्स्यायनः, २०५४, पृ ६) इति । एवमस्यन्यायदर्शनस्य स्वरूपावलोकनेन ज्ञायते ।

महर्षिकणादेन च दशसु अध्यायेषु वैशेषिकसूत्राणि रचितानि । तस्य विस्तृतं व्याख्यानञ्च प्रशस्तपादाचार्येण विहितम् । तदुपरि च नैयायिकप्रवरेण उदयनाचार्येण न्यायकिरणावली रचिता

तथैव श्रीधराचार्येण न्यायकन्दली । एवमेव क्रमशः वैशेषिकशास्त्रपरम्परा विस्तृता । वैशेषिकशास्त्रे द्रव्यगुणकर्मसामान्यविशेषसमवायाभाख्याः सप्त पदार्था प्रतिपादिताः सन्ति । तत्क्रमे एव प्रमाणस्वरूपं च चिन्तितमस्ति । प्रत्यक्षमनुमानञ्चेति प्रमाणद्वयं वैशेषिकाः स्वीकुर्वन्ति । न्यायदर्शने च प्रमेयस्वरूपनिश्चयार्थं चत्वारि प्रमाणानि स्वीकृतानि सन्ति । तानि च प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि (न्यायसूत्रम्, १।१।३) इति सूत्रकारेणैव स्पष्टीकृतानि ।

प्रारम्भकाले न्यायवैशेषिकयोः भिन्न-भिन्नरूपेण प्रवृत्तिः सञ्जाता। अत एव इमौ भिन्न-भिन्नदर्शनत्वेनैव सुप्रसिद्धौ जातौ । किन्तु अर्वाचीनकाले प्रमाणनिर्वचनप्रधानस्य न्यायदर्शनस्य पदार्थनिर्वचनप्रधानस्य च वैशेषिकस्य च परस्परं परिपूरकत्वात् समानतन्त्रत्वेन व्यवहाराच्च दर्शनद्वयगतविषयान् क्रोडीकृत्य एकत्रैव विषयविवेचनमारब्धम् । अत एवाधुना न्यायवैशेषिकदर्शनप्रवेशोत्सुकानां कृते विरचितेषु तर्कसंग्रह-तर्कभाषा-मुक्तावल्यादिग्रन्थेषु दर्शनद्वयगतानां विषयाणां विवेचनं दृश्यते । वैशेषिकोक्तसप्तपदार्थानां न्यायोक्तचतुःप्रमाणानाञ्च प्रतिपादनं समेषामत्र समानं दृश्यते । प्राचीनेषु न्यायवैशेषिकसम्बद्धेषु ग्रन्थेषु प्रमाणनिर्वचनप्रसङ्गे तत्रापि प्रत्यक्षनिरूपणावसरे इन्द्रियार्थसम्बन्धरूपो सन्निकर्षो यत्रतत्र विचारितो वर्तते । तेषां यत्रतत्र प्रसृतानां सन्निकर्षविषयकविषयाणां पुनः नव्यैर्व्यवस्थिततया चिन्तनं विहितमवलोक्यते । किन्तु तत्र सर्वेऽपि न्यायवैशेषिकसम्बद्धा विषयाः प्रतिपादिताः सन्ति । अतोऽत्र सन्निकर्षमात्रस्य चर्चा विहितास्ति ।

यतोहि चतुर्षु प्रमाणेषु प्रथमस्य प्रत्यक्षप्रमाणस्य सहयोगितया सन्निकर्ष आवश्यकः, तं विना इन्द्रियग्रामरूपप्रत्यक्षेण साक्षात् प्रमेयज्ञानं न जनयितुं शक्यते । अतः स सन्निकर्षः कीदृशः, कतिविधः? किञ्च तस्य स्वरूपम् ? के च तस्य भेदाः ? कथञ्च तेषां स्वरूपम् ? इत्यादयः प्रश्नास्समस्या वा समुद्यन्ति । यद्यपि मुक्तावल्यादिषु एते विषयाः प्रतिपादिताः सन्ति । किन्तु तत्र तदतिरिक्तानां बहूनां विषयाणामपि विवेचनात् सन्निकर्षमात्रस्य स्वरूपज्ञानं दुःशकमिव भवति । अतः सरलया गिरा लौकिकालौकिकभेदभिन्नस्य सन्निकर्षस्य यथार्थस्वरूपमत्र विश्लिष्यते .

सामान्यतो न्याय-वैशेषिकदर्शनसम्बद्धसूत्रभाष्यादिप्राचीनग्रन्थानामध्ययनं विधाय दर्शनद्वयगतविषयाणां संग्रहेण प्रतिपादनपराणां न्यायसिद्धान्तमुक्तावल्यादिप्रकरणग्रन्थाणाञ्चाध्ययनं कृत्वा सन्निकर्षविषयकतत्तदाचार्यमतानि सूक्ष्मेक्षिकया विविच्य च लिखितस्यानुसन्धानात्मकस्यालेखस्य विषयक्षेत्रमपि तावदेवास्ति । एकस्मिँल्लघुलेखे सकलदर्शनगतसमग्रविषयाणां विवेचनमसम्भवमिति न्यायवैशेषिकदर्शनोक्तं सन्निकर्षमाधृत्यैवात्र संक्षेपेणानुसन्धानं विहितमस्तीति तावदेवास्य सीमा च वर्तते ।

## अध्ययनविधिः

इदमनुसन्धानकार्यं मुख्यतया विषयविश्लेषणविधिमाश्रित्य विहितं वर्तते । तच्च पुस्तकालयादिकमनुसृत्य सामग्रीसंकलनं विधाय च विषयविवेचनं कृतमस्ति । अत्र हि न्याय-तदितरदर्शनप्रतिपादकानां सूत्रभाष्यादिग्रन्थानां तद्विवरणभूतानामर्वाचीनग्रन्थानाञ्चाध्ययनेन प्राप्तानि तथ्यानि सङ्कलय्य प्राप्तसामग्रीणां गहनतया विवेचनञ्च विधाय निष्कर्षः स्थापितो वर्तते । अत्र सामग्रीणां विवेचनक्रमे यथावश्यकमागमननिगमनात्मकविधेश्च प्रयोगो विहितो विद्यते ।

## सैद्धान्तिकपर्याधारः

अस्यानुसन्धानस्य विषयक्षेत्रं न्याय-तदितरदर्शनप्रतिपादकानां गौतमादिमहर्षिप्रणीतानां सूत्रभाष्यादि-मूलग्रन्थानां स्वतः प्रामाणिकत्वात् तेषां सत्यापनाय सैद्धान्तिकपर्याधारस्य नास्त्यावश्यकता तथाप्यस्मिन्नध्ययने न्यायसूत्र-भाष्यादिग्रन्थेभ्यः, तद्विवरणभूतकतिपयाधुनिकग्रन्थेभ्यश्च सामग्रीसङ्कलनं कृतमस्तीति एते ग्रन्था एव कथञ्चिद् सैद्धान्तिकाधारत्वेन अङ्गीकृता इति वक्तुं शक्यते । विषयविवेचनक्रमे सङ्कलिततथ्यानां सन्दर्भस्रोतःप्रदर्शनाय गद्यात्मकाधुनिकग्रन्थानां कृते लेखकमितिपृष्ठपद्धतेः (एपीएपद्धतेः), सूत्रसन्दर्भप्रदर्शनाय च संस्कृतवाङ्मयान्तर्गते न्याय-तदितरदर्शनेषु बहुप्रचलिताया अध्यायपादसूत्रसंख्यापद्धतेश्च प्रयोगः कृतो वर्तते । अत्र शीर्षकोपशीर्षकाणि क्रमशः प्रदर्श्य विषयं विविच्य निष्कर्षः स्थापितो वर्तते ।

## विषयविश्लेषणम्

अनुसन्धानात्मकेऽस्मिन् आलेखे प्रत्यक्षप्रमोत्पत्तौ संयोगादिरूपाणां षड्विधानां लौकिकसन्निकर्षाणां सामान्यलक्षणप्रत्यासत्तिरूपाणां त्रिविधानामलौकिकसन्निकर्षाणाञ्च विवेचनं विहितमस्ति । तत्र प्रासङ्गिकतया प्रमाणमिति शीर्षकं प्रदाय तत्स्वरूपम्, प्रमाणसंख्या, प्रमास्वरूपं तद्भेदस्य प्रत्यक्षस्य स्वरूपञ्च प्रदर्श्य तत्र सन्निकर्षो नाम कः ? तद्भेदाः, तदवान्तरोपभेदाश्च के ? इति जिज्ञासासमाधानाय सन्निकर्षः इत्येवं शीर्षकं दत्त्वा तद्भेदोपभेदान् प्रदर्श्य पुनः क्रमशः सन्निकर्षो लौकिकालौकिकभेदेन द्विविधो वर्तते इत्येवं मुख्यशीर्षद्वयेन भेदमुपवर्ण्य तत्र तत्र तदवान्तरभूतानां संयोग-संयुक्तसमवाय-संयुक्तसमवेतसमवाय-समवाय-समवेतसमवाय-विशेषणविशेष्यभावरूपाणां षड्विधानां लौकिकानाम्, सामान्यलक्षणा-ज्ञानलक्षणा-योगजरूपाणां च त्रिविधानामलौकिकप्रत्यासत्तीनाञ्च क्रमशः उपशीर्षकाणि प्रदाय विवेचनं विश्लेषणञ्च विधाय अन्त्ये सशीर्षको निष्कर्षः प्रकटितो वर्तते ।

### प्रमाणम्

प्रमीयते अनेनेति तत् प्रमाणम् । प्रपूर्वक'मा'धातोः करणार्थकल्युट्प्रत्यये अनादेशे च प्रमाणशब्दो निष्पद्यते ।

लौकिकेन व्यवहारेणैवानुभवः कर्त्तुं शक्यते यत् प्रमाणस्य कियदावश्यकत्वं महत्त्वञ्चास्तीति, यथार्थज्ञानार्थं (वस्तुस्थितेर्ज्ञानार्थं) तदेकं कियन्महत्वपूर्णं साधनमस्तीति । तत्तु ज्ञानस्य मापदण्डः, यश्च यथार्थञ्चैकत्र विन्यस्य पृथक् करोति। विलक्षणः कश्चन हंसोऽपि तत्, यस्य नीरक्षीरविवेकिता लोकशास्त्रप्रसिद्धा। तन्नाम निकषः, यत्र परीक्ष्य ज्ञानस्य वास्तविकता परिचीयते । अत एव तत् समग्रपदार्थानां व्यवस्थापकं ज्ञानसामान्यस्य च निर्णायकम् । ज्ञानयाथार्थ्यस्य च सिद्धिरेतदधीनेति वक्तुं शक्यते । यत्र पश्यामस्तत्रास्य साम्राज्यमस्ति । न्यायाधीशो न्यायस्याधाररूपेणैतदेव स्वीकरोति, न्यायप्रदानाय प्रमाणञ्चापेक्षते । इदमेव यथार्थज्ञानस्य साधनमद्यापि राजदूताध्यापकादिभिः स्वकार्यस्य वास्तविकपरिचयप्रदानार्थमुपस्थाप्यते, प्रमाणपत्रञ्च प्रस्तूयते । अनेनैवास्योपादेयताया व्यापकतायाश्च परिचयः सुशकः । अस्यैतदेव महत्त्वमादाय नैयायिकैरिदमीश्वरस्य समकक्षतां नीतम् । अर्थनिर्णयकाले इन्द्रियाणां स्वच्छता हेतूनां (कारणानां ) सत्यता अस्य कृतेऽपेक्षिता भवति ।

शास्त्रेऽपि पदार्थनिर्णयार्थं प्रमाणस्यावश्यकता भवति। प्रमाणं विना न कोऽपि विषयो निश्चेतुं शक्यते। किं सत्यम् किमसत्यम् ? किमुत्कृष्टम् किञ्चानुत्कृष्टम् ? किमुपादेयम् किं त्याज्यम् ? इत्यादिज्ञानाय लोके

शास्त्रे च प्रमाणस्यापरिहार्यता वर्तते । शास्त्रेषु वादजल्पादिस्थलेष्वपि निर्णयार्थं प्रमाणमेव आधारो भवति । न केवलं शास्त्रेषु लौकिकव्यवहारेष्वपि सर्वत्रैव प्रमाणस्यावश्याकता दृश्यते । प्रवर्तनापूर्वं प्रयोजनं निर्धायते । उक्तं च 'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते' (सुप्रसिद्धं लौकिकमाभाणकम्) इति । तच्च तर्कवितर्कपूर्वकं निर्णीयते । निर्णयश्च प्रमाणानुगामी भवति । अतश्शक्यते वक्तुं यत्- सर्वमपि लौकिकं शास्त्रीयं च जीवनं प्रमाणजीवितंवर्तते । अत एवोक्तं दर्शने- 'मानाधीना मेयसिद्धिर्मानसिद्धिश्च लक्षणात्'इति ।

एतदुक्तं भवति - न्यायग्रन्थेषु प्रमाणविषयकं चिन्तनं विशेषतो वर्तते । यतोहि न्यायदर्शनमिदं मुख्यतया प्रमाणनिर्वचनपरकमस्ति । अत एव प्रमाणशास्त्रत्वेन सुप्रसिद्धिरस्ति शास्त्रस्यास्य । नैयायिकैः प्रमाणविवेचनक्रमे तदितरशास्त्रोक्तप्रमाणस्वरूपं सभेदं प्रदर्श्य खण्डितम् । तद्यथा - सांख्ययोगदर्शनादिषु विषयाकाराकारिता चित्तवृत्तिः प्रमाणम् । मीमांसायां भाट्टमतेऽगृहीतग्राहियथार्थज्ञानकरणमेव प्रमाणम् । प्राभाकरमते चानुभूतिरेव प्रमाणम् । वेदान्तेऽन्तःकरणपरिणामरूपाया वृत्तेरेव प्रमाणत्वम् । बौद्धदर्शने चाविसंवादकं ज्ञानं प्रमाणम् । जैनदर्शने च स्वपरावभासकं ज्ञानं प्रमाणमिति ।

तच्च प्रमाणं प्रत्यक्षादिभेदादनेकविधम् इति सकलदर्शनानां प्रमाणविषयकं सामान्यचिन्तनं विद्यते । किन्तु प्रमाणस्वरूपस्य विशदतया निष्कृष्टतया च विमर्शो विशेषतो नैयायिकैरेव कृतोऽवलोक्यते । अत एव च न्यायशास्त्रं प्रमाणशास्त्रमिति नाम्ना प्रसिद्धम् । एवं सत्यपि प्रमाणस्वरूपविषये, तत्संख्याविषये च विवदन्ते दार्शनिकाः । केषाञ्चिन्मते प्रमितिरेव प्रमाणमस्ति चेत्, केषाञ्चित्तु प्रमितिजनकं किञ्चिदन्यदेव । ततोऽपि प्रमाणसंख्याविषये दार्शनिकाः परस्परं बहु कलहायमाना अवलोक्यन्ते । तत्र प्रसिद्धमेतत्– प्रत्यक्षैकप्रमाणवादी चार्वाकः । प्रत्यक्षानुमाने द्वे प्रमाणमिति बौद्धवैशेषिकादयः । प्रत्यक्षानुमानसहितेन शब्दाख्यप्रमाणेन प्रमाणत्रयमिति सांख्ययोगनैयायिकैकदेशिनः, अन्ये च केचित् । प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि इति गौतमः, तदनुयायिनश्च । प्रत्यक्षादिप्रमाणचतुष्टयेन सहार्थापत्तिरपीति प्रमाणपञ्चकमाहत्येति केचिन्मीमांसकाः । प्रमाणपञ्चकसहितम् अनुपलब्धिप्रमाणमाहत्य षोढा प्रमाणपदवाच्यमिति अद्वैतवेदान्तिनो भाट्टमीमांसकाश्च । ऐतिह्यम्, सम्भवः, चेष्टा च स्वतन्त्रतया प्रमाणसंज्ञां लभन्त इति तान्त्रिकाः, ज्योतिर्विदः, पौराणिकादयश्च । तत्र न्यायोक्तचतुःप्रमाणवाद एव युक्तियुक्तो दृश्यते । यतस्ततो न्यूनेन व्यवहारासम्भवात्, अधिकस्य चानावश्यकत्वात् । प्रमाणेषु ज्येष्ठं श्रेष्ठञ्चास्ति प्रत्यक्षम्, यतोहि लोके तद् विना न कस्यापि किमपि कार्यं सम्पद्यते । शास्त्रे च तथैव स्थितिः । अत एव अन्येषामनुमानादीनां प्रमाणानामस्वीकर्ता चार्वाकोऽपि स्वसिद्धान्तस्थापनाय प्रत्यक्षमिदमेकं प्रमाणमङ्गीकरोति । अन्येऽपि सर्वे दार्शनिकाः प्रत्यक्षसहितान्येव अनुमानादीनि प्रमाणानि स्वीकुर्वन्ति । प्रत्यक्षं विना अन्येषामनुमानादीनां प्रामाण्यमप्यसम्भवं भवति । एतादृशस्य प्रत्यक्षस्य प्रामाण्यञ्च इन्द्रियाणां विषयाणाञ्च मध्ये सम्बन्धाधीनमस्ति । यदा चक्षुरादीन्द्रियाणां स्वस्वविषयेषु सम्बन्धो जायते तदैव प्रत्यक्षात्मिका प्रमा उत्पद्यते । यदा प्रमोत्पद्यते तदैव इन्द्रियादीनां प्रत्यक्षप्रमाणत्वं सिद्ध्यति । अतः सन्निकर्षापरपर्यायरूपविषयेन्द्रियसम्बन्धोऽत्र प्रमाजनने व्यापाररूपेण तिष्ठति । सन्निकर्षाख्यं व्यापारं विना न प्रत्यक्षप्रमा उत्पद्यते, न वेन्द्रियेषु प्रत्यक्षप्रमाणत्वञ्च सम्भवति । सम्प्रति इन्द्रियस्यार्थस्य च सन्निकर्षेण जायमानं ज्ञानं प्रत्यक्षमिति तु वरम्, तत्र सन्निकर्षस्य स्वरूपं कीदृशम् ? स च कतिविधः ? इत्यादिविषया परिशीलनीयाः सन्ति । अत एवात्र महत्त्वपूर्णस्यास्य सन्निकर्षस्य परिचर्चा आरभ्यते ।

## सन्निकर्षः

सम् नि उपसर्गद्वयपूर्वकात् कृष्धातोः घञ्प्रत्यये सति सन्निकर्षशब्दः सिद्ध्यति । अस्य लोके सान्निध्यादिरूपार्थे प्रयोगे सत्यपि न्यायशास्त्रे विषयेन्द्रियसम्बन्धरूपेऽर्थे प्रयोगो भवति । स च सम्बन्धो द्विविधो वर्तते - लौकिकालौकिकभेदेन । स च प्रत्यक्षप्रमोत्पत्तिकाले आवश्यको भवति । प्रत्यक्षां तावत् लक्षणकारैर्नानाविधतया लक्षितं वर्तते । सामान्यरूपेण इन्द्रियार्थसन्निकर्षजन्योऽसन्दिग्धः, किं वा यथार्थानुभव एव प्रत्यक्षम् । तथा चास्माकं पुरतः स्थितेन घटेन सह अस्मन्नेत्रेन्द्रियस्य सन्निकर्षे जाते 'अयं घटः' इत्येवंरूपं यद्घटज्ञानं जायते, तदेव प्रत्यक्षम् । दूरे स्थितस्य कस्यचन पुरुषस्य नेत्रेन्द्रियेण सह पिप्पलाख्यादेर्वृक्षस्य सन्निकर्षे जाते 'बटोऽयम्' इति यज्ज्ञानं जायते, तत्तु न खलु यथार्थं ज्ञानं प्रत्युतो भ्रमात्मकं ज्ञानमतो न प्रत्यक्षम् । ततश्च सन्देहरहितं भ्रमरहितञ्च यज्ज्ञानं तदेव प्रत्यक्षम् । एतावता च निष्कर्षे इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं प्रत्यक्षं तत्करणं प्रत्यक्षप्रमाणमिति तु फलितोऽर्थो भवति । एतेन प्रत्यक्षप्रमोत्पत्तौ इन्द्रियार्थयोः सन्निकर्षस्य महत्त्वपूर्णं स्थानं वर्तते इति ज्ञायते ।

प्रत्यक्षप्रक्रियायाम् आत्मनो मनसा सह सन्निकर्षात्, मनसश्चेन्द्रियैः सह, इन्द्रियाणाञ्चार्थैः सह सन्निकर्षात् प्रकृष्टप्रकाशादीनां समवहितत्वदशायामात्मनि यज्ज्ञानं जायते तदेव प्रत्यक्षमुच्यते । तत्र ह्यात्मनि प्रत्यक्षज्ञानोत्पत्तौ त्रयः सम्बन्धाः कल्प्यन्ते - अर्थानां बाह्येन्द्रियाणाञ्च सन्निकर्षो जायते । ततश्चेन्द्रियाणि बाह्यपदार्थविषयकं ज्ञानं मनः प्रति निवेदयन्ति, मनश्चात्मानं प्रति अर्पयति । तत एव प्रत्यक्षज्ञानं पूर्णतां गच्छति -"इन्द्रियस्यार्थेन सन्निकर्षाद् उत्पद्यते यज्ज्ञानं तत्प्रत्यक्षम्, न तर्हीदानीमिदं भवति- आत्मा मनसा संयुज्यते, मन इन्द्रियेण इन्द्रियमर्थेनेति" (वात्स्यायनः, २०५४, पृ.२०) । उपर्युक्तेन च व्याख्यानेन प्रत्यक्षज्ञानं प्रति मनसः सातिशयं महत्त्वं समुत्पादितं भवति । मनसोऽनुपस्थितावव्यवस्थितत्वे वा प्रत्यक्षज्ञानं न सम्भवति । एतावता च प्रत्यक्षोत्पत्तये इन्द्रियमनसोः योगोऽत्यन्तमपरिहार्यः । अन्येषु च प्रमाणेष्वपि सत्यपि मनसो महत्त्वे नैतादृशं प्रतिपादितम् । दर्शने चास्मिन्न्याये प्रत्यक्षज्ञाने बाह्येन्द्रियमनोयोगविवेचनस्यास्ति मनोवैज्ञानिकं महत्त्वमस्ति ।

## लौकिकसन्निकर्षः

प्रत्यक्षज्ञानहेतुभूतः सन्निकर्षः लौकिकालौकिकभेदेन द्विविधः । तत्र लौकिकसन्निकर्षः षड्विधः – संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति । कस्यापि वस्तुनः प्रत्यक्षं भवति चेत्तत्र विषयेन्द्रियसन्निकर्ष आवश्यकः । न्यायादर्शनानुसारेण घटपटादिद्रव्याणामेव न प्रत्यक्षं किन्तु तद्गतगुणानां कर्मणां तद्गतजातीनामपि प्रत्यक्षं भवति । तदुक्तं तर्कभाषाकारेणैवम् - "इन्द्रियार्थयोस्तु यः सन्निकर्षः साक्षात्कारिप्रमाहेतुः स षड्विध एव । तद्यथा संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति" (मिश्रः, सन् १९९०, पृ.५४) । इदानीं सर्वेषामपि संनिकर्षाणां क्रमशः निरूपणं क्रियते ।

## संयोगसन्निकर्षः

चक्षुषा घटप्रत्यक्षजनने संयोगः संनिकर्षः । कुतः ? चक्षुरिन्द्रियेण घटस्य प्रत्यक्षं कर्तव्यञ्चेत् तत्र तयोः घटेन्द्रिययोर्मध्ये संयोगः संनिकर्षः बोध्यः । कुतः ? 'द्रव्ययोस्संयोगः' इति नियमानुसारेणेन्द्रियेण घटप्रत्यक्षं यदा भवति, तदा संयोगस्सन्निकर्षः ज्ञातव्यः । एवमेव त्वगिन्द्रियस्थलेऽपि संयोगस्संनिकर्षः ज्ञेयः ।

न्यायबोधिनीकारस्तु एवमाह– "द्रव्यवृत्तिलौकिकविषयतासम्बन्धेन चाक्षुषत्वावच्छिन्नं प्रति चक्षुस्संयोगस्य कारणत्वमिति" (**गोवर्धनसुधीः, सन् २००४, पृ.३५**) । एतदेव तर्कभाषाकास्तु सरलया गिरैवमाह - "तत्र यदा चक्षुषा घटविषयकं ज्ञानं जन्यते, तदा चक्षुरिन्द्रियं, पटोऽर्थः । अनयोः सन्निकर्षः संयोग एव, अयुतसिद्ध्यभावात् । एवं मनसान्तरिन्द्रियेण यदात्मविषयकं ज्ञानं जन्यतेऽहमिति, तदा मन इन्द्रियम्, आत्माऽर्थः, अनयोः सन्निकर्षः संयोग एव" (मिश्रः, सन् १९९०, पृ.५४) ।

**संयुक्तसमवायसन्निकर्षः**

चक्षुषा घटरूपप्रत्यक्षजनने संयुक्तसमवायस्सन्निकर्षो भवति । यतः चक्षुरिन्द्रियस्य साक्षात्सम्बन्धस्तु घटेन सह, पुनस्तत्र घटे घटरूपं समवायसम्बन्धेन तिष्ठति । अतो घटरूपप्रत्यक्षे संयुक्तसमवायः सन्निकर्षो बोध्यः । उदाहरणमिदम्, त्वाचप्रत्यक्षेऽपि अयं सन्निकर्षो भवतीति ज्ञेयम् । त्वगिन्द्रियेण घटादिषु विद्यमानकर्मप्रत्यक्षे संयुक्तसमवायसन्निकर्षो भवतीति बोध्यम् । न्यायबोधिनीकारस्तु परिष्कृतं लक्षणमेवमाह – "द्रव्यसमवेतवृत्तिलौकिकविषयतासम्बन्धेन चाक्षुषत्वावच्छिन्नं प्रति चक्षुः समवेतसमवायस्य हेतुत्वमित्याह" (**गोवर्धनसुधीः, सन् २००४, पृ.३५**) । एवमेव तर्कभाषाकारोऽपि सप्रश्नमाह - "कदा पुनः संयुक्तसमवायः सन्निकर्षः ? यदा चक्षुरादिना घटगतरूपादिकं गृह्यते घटे श्यामं रूपमस्तीति, तदा चक्षुरिन्द्रियम्, घटगतरूपमर्थः, अनयोः सन्निकर्षः संयुक्तसमवाय एव । चक्षुसंयुक्ते घटे रूपस्य समवायात् । एवं मनसा आत्मसमवेते सुखादौ गृह्यमाणे अयमेव सन्निकर्षः" (मिश्रः, सन् १९९०, पृ.५४) ।

**संयुक्तसमवेतसमवायसन्निकर्षः**

रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षः । यथा घटे रूपं समवायेन तिष्ठति । तत्र च रूपे रूपत्वमपि समवायेन तिष्ठति । तत्प्रत्यक्षं कर्तव्यञ्चेत् संयुक्तसमवेतसमवायः सन्निकर्षो बोध्यः । तथाहि चक्षुरिन्द्रियसंयुक्तः घटः, तत्र च घटे समवेतं रूपम्, तत्रापि रूपे समवेतं रूपत्वम्, अत एव तादृशरूपत्वप्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षो विज्ञेयः । न्यायबोधिनीकारस्तु परिष्कार युतं लक्षणमित्थमाह-"द्रव्यसमवेतसमवेतवृत्तिलौकिकविषयतासम्बन्धेन चाक्षुषत्वावच्छिन्नं प्रति चक्षुः संयुक्तसमवेतसमवायस्य हेतुत्वमिति" (**गोवर्धनसुधीः, सन् २००४, पृ.३५**) । तथैव अस्य सन्निकर्षस्य सोदाहरणं विवेचनं करोति केशवमिश्रः - "यदा पुनश्चक्षुषा घटरूपसमवेतं रूपत्वादिसामान्यं गृह्यते, तदा चक्षुरिन्द्रियम्, रूपत्वादिसामान्यमर्थः, अनयोः सन्निकर्षः संयुक्तसमवेतसमवाय एव । चक्षुसंयुक्ते घटे रूपं समवेतम्, तत्र रूपत्वस्य समवायात्" (मिश्रः, सन् १९९०, पृ.५५) ।

**समवायसन्निकर्षः**

श्रोत्रेण शब्दसाक्षात्कारे समवायस्सन्निकर्षः । श्रोत्रेन्द्रियेण शब्दस्य प्रत्यक्षं कर्तव्यञ्चेत् समवायः सन्निकर्षो भवति । ननु शब्दस्य श्रोत्रस्य च कथं समवायः ? यतः शब्दो हि आकाशस्य गुणः । स च आकाशे समवायेन खलु तिष्ठति । अत एव तयोः समवायसन्निकर्षः वक्तव्यः, न तु श्रोत्रशब्दयोरिति चेत् । सत्यम् । कर्णविवरवर्त्याकाश एव श्रोत्रम् । अतः शब्दस्य श्रोत्रस्य च समवायः सम्बन्धो भवितुमर्हति । ननु दूरस्थशब्दस्य श्रोत्रेन्द्रियेण सह कथं सम्बन्धः ? इति प्रश्ने वीचीतरङ्गन्यायेन कदम्बमुकुलन्यायेन वा शब्दाच्छब्दान्तरोत्पत्तिक्रमेण श्रोत्रेन्द्रियदेशे शब्दस्य श्रोत्रसम्बन्धात् प्रत्यक्षत्वं सम्भवति । वीचीतरङ्गस्ततो द्वितीयस्तृतीय इत्येवं शब्दा अपि परित उत्पद्यन्त इति भावः । कदम्बमुकुलन्यायः - कदम्बमुकुले

प्रथमं परितो दलानामेकं चक्रं ततो द्वितीयं ततस्तृतीयं क्रमशः जायते, तद्वत् प्रथमं भेरीदण्डसंयोगेनैकः शब्दस्ततोऽन्ये शब्दास्ततो दशसु दिक्षु शब्दा उत्पद्यन्त इति । अस्यैव परिष्कृतं लक्षणं न्यायबोधिनीकार आहैवम् - "श्रवणेन्द्रियस्याकाशरूपत्वेन शब्दस्याकाशगुणत्वेन श्रवणेन्द्रियसमं शब्दस्य समवायसन्निकर्ष इति"(**गोवर्धनसुधीः, सन् २००४, पृ.३७**) । समवायसन्निकर्षविषये तर्कभाषाकार एवं जिज्ञासासहितं वक्ति - "कदा पुनः समवायः सन्निकर्षः ? यदा श्रोत्रेन्द्रियेण शब्दो गृह्यते, तदा श्रोत्रमिन्द्रियम्, शब्दोऽर्थः, अनयोः सन्निकर्षः समवाय एव । कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रम् । श्रोत्रस्याकाशात्मकत्वाच्छब्दस्य चाकाशगुणत्वाद् गुणगुणिनोश्च समवायात्" (मिश्रः, सन् १९९०, पृ.५६) ।

**समवेतसमवायसन्निकर्षः**

शब्दत्वसाक्षात्कारे समवेतसमवायः सन्निकर्षः । श्रोत्रेन्द्रियेण शब्दसमवेतशब्दत्वस्य प्रत्यक्षं कर्तव्यञ्चेत् समवेतसमवायः सन्निकर्षो बोध्यः । तथाहि - श्रोत्रसमवेतश्शब्दः तत्र च शब्दे शब्दत्वस्य समवायेन विद्यमानत्वाद् तादृशप्रत्यक्षे समवेतसमवायसन्निकर्षो भवति । तदेतत् समवेतसमवायसन्निकर्षस्य लक्षणं परिष्करोति न्यायबोधिनीकारः – "शब्दवृत्तिशब्दत्वकत्वखत्वादिजातिविषयकश्रावणप्रत्यक्षे श्रोत्रसमवेतसमवायस्यैव हेतुत्वमिति" (**गोवर्धनसुधीः, सन् २००४, पृ.३७**) । समवेतसमवायविषये तर्कभाषाकार एवं व्याकुरुते - "यदा पुनः शब्दसमवेतं शब्दत्वादिकं सामान्यं श्रोत्रेन्द्रियेण गृह्यते, तदा श्रोत्रमिन्द्रियम्, शब्दत्वादिकं सामान्यमर्थः । अनयोः सन्निकर्षः समवेतसमवाय एव, श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात्" (मिश्रः, सन् १९९०, पृ.५६) ।

**विशेषणविशेष्यभावसन्निकर्षः**

अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः बोध्यः । अत्र विवरणम्- विशेषणविशेष्यभावो हि इन्द्रियसम्बद्ध-विशेषणत्वम्, इन्द्रियसम्बद्धविशेष्यत्वमिति च बोध्यम् । उदाहरणन्तु घटाभाववद् भूतलमित्येकम् । इह भूतले घटो नास्तीति अपरम् । घटाभाववद्भूतलमित्यत्र विशेषणभावः सन्निकर्षः । तथाहि- घटाभाववदिति विशेषणं, भूतलन्तु विशेष्यम् । अत्र भूतले घटाभावः स्वरूपसम्बन्धेन विशेषणम् । षड्विधसन्निकर्षेषु विशेषणता बहुविधा भवति । यथा द्रव्यवृत्त्यभावप्रत्यक्षे इन्द्रियसंयुक्तविशेषणता, द्रव्यसमवेतरूपादिवृत्तेर्घटाभावस्य प्रत्यक्षे इन्द्रियसंयुक्तसमवेतविशेषणता, द्रव्यसमवेतसमवेतरूपत्वादिवृत्तेर्घटाभावस्य प्रत्यक्षे इन्द्रियसंयुक्तसमवेतसमवेतविशेषणता, शब्दे रूपाभावप्रत्यक्षे श्रोत्रावच्छिन्नसमवेतविशेषणता, शब्दवृत्तिर्यो रूपाभावः, तत्र यः क्रियाभावः, तत्प्रत्यक्षे श्रोत्रसमवेतसमवेतविशेषणता इत्येवमर्थादिभेदेनेन्द्रियादिभेदेनाऽपि बहवः सन्किर्षाः भवन्तीति बोध्यम् । भूतले घटो नास्तीत्यादौ विशेष्यताख्यः सन्निकर्षः विज्ञेयः, भूतले घटो नास्तीत्यस्य भूतले घटाभाव इत्यर्थः । तत्र वृत्तित्वसम्बन्धेन भूतलं घटाभावे विशेषणम्, घटाभावस्तु विशेष्यः । तत्रैव विशेषणतासन्निकर्षो बोध्य इति भावः । अस्य सन्निकर्षस्य विवेचनं तर्कभाषाकारश्चैवं करोति -

यदा चक्षुषा संयुक्ते भूतले घटाभावो गृह्यते - इह भूतले घटो नास्ति इति, तदा विशेष्यविशेषणभावः सम्बन्धः । तदा चक्षुःसंयुक्तस्य भूतलस्य घटाद्यभावो विशेषणम्, भूतलं विशेष्यम् । यदा च मनःसंयुक्त आत्मनि सुखाद्यभावो गृह्यते - अहं सुखरहित इति । तदा मनःसंयुक्तस्यात्मनः सुखाद्यभावो विशेषणम् । यदा श्रोत्रसमवेते गकारे घत्वाभावो गृह्यते, तदा श्रोत्रसमवेतस्य गकारस्य

घत्वाभावो गृह्यते, तदा श्रोत्रसमवेतस्य गकारस्य घत्वाभावो विशेषणम् । तदेवं संक्षेपतः पञ्चविधसम्बन्धान्यतमसम्बन्धसम्बद्धविशेषणविशेष्यभावलक्षणेनेन्द्रियार्थसन्निकर्षेणाभाव इन्द्रियेण गृह्यते । एवं समवायोऽपि । चक्षुःसम्बद्धस्य तन्तोर्विशेषणभूतः पटसमवायो गृह्यते - इह तन्तुषु पटसमवाय इति (मिश्रः, सन् १९९०, पृ.५७) ।

अन्त्ये च समेषामेषां सन्निकर्षाणां सोदाहरणं स्वरूपमत्रोपसंहरन् कारिकाद्वयेन स्पष्टयति तर्कभाषाकारः - तदेवं षोढा सन्निकर्षो वर्णितः । संग्रहश्च -

अक्षजा प्रमितिर्द्वेधा सविकल्पविकल्पिका ।
करणं त्रिविधं तस्याः सन्निकर्षश्च षड्विधः॥
घट-तन्नील-नीलत्व-शब्द-शब्दत्वजातयः।
अभावसमवायौ च ग्राह्याः सम्बन्धषट्कतः ॥ (मिश्रः, सन् १९९०, पृ.५८) ।

## अलौकिकसंनिकर्षः

अलौकिकसन्निकर्षस्तु नैयायिकैः त्रिप्रकारो वर्णितः । सामान्यलक्षणः, ज्ञानलक्षणः, योगजश्चेति । सामान्यं नाम जातिः घटादिव्यक्तिश्च, तदेव लक्षणं = स्वरूपं यस्येति व्युत्पत्त्या जात्यात्मको व्यक्त्यात्मकश्च संनिकर्षः प्रथमः । ज्ञानमेव लक्षणं स्वरूपं यस्य स ज्ञानात्मकः संनिकर्षः द्वितीयः । योगजः-चित्तवृत्तिनिरोधाज्जन्यस्संयमः- ध्यानधारणासमाध्यात्मकः संनिकर्षस्तृतीयः । अलौकिकसन्निकर्षविषये तर्कसंग्रहतर्कभाषादिग्रन्थेषु मूले चर्चा विहिता नास्ति । प्रपथमं न्यायशास्त्रे प्रविविक्षूणां बालानां कृते तावदनुपयुक्तत्वात् । किन्तु तेषां व्याख्यानपरकेषु ग्रन्थेषु मुक्तावल्यादिषु च विस्तृततया प्रतिपादितमस्ति । तदुक्तं कारिकावलीकारेण -

अलौकिकस्तु व्यापारस्त्रिविधः परिकीर्तितः ।
सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा । (**भट्टाचार्यः, सन् २००३, कारिका ६३**)
अतोऽत्रापि तेषां परिचयार्थं क्रमशो विवेचनं क्रियते ।

## सामान्यलक्षणप्रत्यासत्तिः

अधिकरणानां भूतलादीनामलौकिकप्रत्यक्षस्य कारणम्, सामान्यज्ञानम्इन्द्रियसम्बद्धविशेष्यकज्ञान-प्रकारीभूतसामान्यज्ञानमेव संनिकर्षः बोध्यः । चक्षुरादीन्द्रियजन्यो यो घटात्मकधर्मस्य बोधस्तत्र चक्षुस्संयुक्तसंयोगः, आलोकसंयोगः, महत्परिमाणम्, उद्भूतरूपादि चेति सामग्र्योऽपि सहकारितया तत्रैवोपस्थिता अपेक्ष्यन्त इति ।

समानानां भावः सामान्यम् । एकधर्मवन्निष्ठसाधारणधर्म इत्यर्थः । यथा घटवत् भूतलमित्यत्र भूतलत्वधर्मवद्- भूतलनिष्ठः साधारणो धर्मो घटः भूतलञ्चेत्युभयं सामान्यं स्वीकर्तुं शक्यते । एतादृशं सामान्यं कुत्रचिद् नित्यं-नित्यजात्याद्यात्मकं धूमत्वभूतलत्वादिरूपं भवति । कुत्रचित् सामान्यमनित्यं भवति । यथा- उत्पत्तिध्वंसप्रतियोगिघटपटाद्यात्मकं बोध्यम् । अलौकिकेषु त्रिषु प्रत्यक्षेषु “सामान्यलक्षणः” इत्यत्र

लक्षणशब्दस्य विषयोऽर्थः बोध्यः । तथा च निर्विकल्पक-साधारणं स्मृतिसाधारणञ्च सामान्यविषयकज्ञानत्वं प्रत्यासत्तितावच्छेदकं बोध्यम् ।

अत्रेदं तात्पर्यम्– समानानां भावः सामान्यम्, तल्लक्षणं यस्य सः सामान्यलक्षणः । अत्र सामान्यशब्दस्यार्थस्तु साधारणो धर्मः । एवं लक्षणस्यार्थस्तु स्वरूपं विषयो वार्थः । तथा च यदि लक्षणस्य स्वरूपार्थः स्वीक्रियते चेत् 'सामान्यलक्षणः' इति शब्दस्य सामान्यस्वरूपसन्निकर्षः इत्यर्थो भवेत् । अयमेवेन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारीभूतधर्मो ज्ञातव्यः । यतो हि पुरोवर्तिघटादिविषयेण सह चक्षुरिन्द्रियस्य संयोगे सति 'घटघटत्वे' इत्याकारं निर्विकल्पकज्ञानानन्तरं 'अयं घटः' इत्याकारकं सविकल्पकं ज्ञानमुत्पद्यते । एतादृशं ज्ञानं घटं विशेष्यविधया विषयीकरोति, घटत्वन्तु प्रकारविधया विषयीकरोति । अतोऽत्र चक्षुःसंयुक्तघटविशेष्यकं 'अयं घटः' इत्याकारकं यत् ज्ञानं तत्र प्रकारीभूतसामान्यं घटत्वं वर्तते । तादृशेन घटत्वरूपेण सामान्यलक्षणसन्निकर्षेण सकलघटविषयकमलौकिकं प्रत्यक्षं भवति । इन्द्रियसम्बन्धस्तु लौकिको ग्राहचः, अर्थात् संयोगादि-षड्विधसन्निकर्षान्यतमो यथायोग्यं ग्राहच इत्यर्थः तदुक्तं कारिकावल्याम् -

आसत्तिराश्रयाणां तु सामान्यज्ञानमिष्यते ।
तदिन्द्रियजतद्धर्मबोधसामग्र्यपेक्ष्यते ॥ (भट्टाचार्यः, सन् २००३, कारिका ६४)।

**ज्ञानलक्षणप्रत्यासत्तिः**

अयञ्चालौकिकसंनिकर्षेषु द्वितीयस्सन्निकर्षः, यस्य साहाय्येन विषयगुणानाम् अलौकिकं ज्ञानं प्राप्तुं शक्यते। एतादृशज्ञानलक्षण-प्रत्यासत्त्यैकविषयकप्रत्यक्षेण सह तत्सम्बन्धिगुणानामपि अस्माकमिन्द्रियसन्निकर्षं विनाऽपि ज्ञानं प्राप्तुं शक्यते । यथा हिमखण्डस्य चाक्षुषज्ञानेन सह तस्य शीतत्वादीनामपि ज्ञानं भवति । इन्द्रियसन्निकर्षस्तु केवलं द्रव्येण सहैव भवति, न तु शीतलादिगुणैः सह । कस्यचन विषयस्येन्द्रियद्वारा ज्ञानेऽपि तत्तद्गुणानाम् इन्द्रियसन्निकर्षं विनाऽपि आत्मस्थज्ञानसन्किर्षेण अलौकिकं ज्ञानं जायते । तथैव 'सुरभि चन्दनम्' इत्यादौ ज्ञानस्यांशद्वयं वर्तते । एकं लौकिकमलौकिकञ्चापरम् । चन्दनखण्डस्य ज्ञानन्तु चक्षुषा भवति किन्तु सुगन्धस्य ज्ञानं घ्राणेनैव भवति । चन्दनस्य चक्षुःसंयोगे सति यज्ज्ञानं जायते, तत् स्वाभाविकम् । परन्तु इन्द्रियसन्निकर्षं विना सुगन्धस्य ज्ञानं कथं भवेत् ? यदि एतादृशविशिष्टज्ञानस्य कारणं विभिन्नमिन्द्रियं स्वीक्रियते तदा नियमविरोधः । नियमस्तु विशिष्टज्ञानस्य न कारणद्वयमपि तु एकमेव । अत्र च एतादृशविशिष्टज्ञानस्य कारणं चक्षुः भवितुं न शक्नोति । कुतः ? सुगन्धांशग्रहणे सामर्थ्याभावात् तस्येति । एवमेव घ्राणेन्द्रियस्य कारणत्वं न वक्तुं शक्यते । कुतः ? तस्य चन्दनग्रहणासमर्थत्वाद् । अत एतादृशावस्थायां तादृशविशिष्टज्ञानस्य कारणत्वं कस्य वक्तव्यम् ? इत्यत्र नैयायिकाः– एतादृशज्ञानस्य कारणं चक्षुरेवेति मन्वते । परन्तु चक्षुषः सौरभेण शीतत्वेन वा सह न कोऽपि सम्बन्धो वर्तते, अपितु द्रव्येण चन्दनेन हिमखण्डेन वा सह सम्बन्धो विद्यते इत्यतः ज्ञानरूपालौकिकसन्निकर्षोऽत्र स्वीक्रियते इति । तदुक्तं कारिकावल्याम् -

विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः ।........ (भट्टाचार्यः, सन् २००३, कारिका ६५) ।

तेन च विशिष्टं ज्ञानमेकं सुरभि चन्दनम्, हिमखण्डः शीतः इत्येवं वेत्युत्पद्यत इति तार्किकाणां भावः ।

अस्येदं तात्पर्यम् -

यदा 'सुरभि चन्दनम्' इत्याकारकचन्दनप्रत्यक्षं भवति, तदा सौरभांशस्य ज्ञानं साधारणतया स्मरणात्मकं भवति। बौद्धा अपि अस्मिन् विषये ज्ञानस्यांशः स्मरणात्मकमेवेति कथयन्ति। परन्तु न्यायदर्शने तथा न स्वीक्रियते। कुतः ? यदि तस्य स्मरणात्मकं स्वीक्रियेत, तदा तद् भूतकालस्य विषयो भवति। एवञ्च तादृशस्य ज्ञानस्यांशद्वयं स्वीकर्तव्यम्। एकं स्मरणात्मकम्, प्रत्यक्षात्मकञ्चापरम्। अंशद्वये भूतकालविषयकम् आदिमम् । वर्तमानकालविषयकञ्चापरम् । एवञ्च एक एव विषयोऽतीतवर्तमानज्ञानयोर्विषयो भवेत्, तद्धि न युक्तम् । अतोऽत्रोक्तज्ञानस्य स्मृतिरूपत्वमनङ्गीकृत्य प्रत्यक्षमेव मन्तव्यम् । अत एव सुगन्धस्य चाक्षुषप्रत्यक्षबोधनाय ज्ञानलक्षणसन्निकर्षः स्वीकृतः । यद्यपि सौरभस्य ज्ञानं सौरभत्वरूपसामान्यलक्षणया भवितुं शक्नोति, किन्तु सौरभत्वज्ञानाय ज्ञानलक्षणावश्यकी। एवं प्रकारेण यद्यपि सामान्यलक्षणा, ज्ञानलक्षणा च। उभेऽपि लक्षणे ज्ञानरूपेऽथापि तयोः परस्परं भेदो वर्तत एव। सामान्यलक्षणा स्वाश्रयप्रत्यक्ष एव कारणं भवति । किन्तु ज्ञानलक्षणया सौरभज्ञानं भवति, न तु सौरभाश्रयस्य ज्ञानं भवति । चन्दनदर्शनानन्तरं सुगन्धस्य या स्मृतिः, तादृशस्मृतिविषयत्वरूपसन्निकर्षः सौरभस्य वर्तते, न तु चन्दनस्य । चन्दनेन सह चक्षुस्संयोगः सन्निकर्षः । अयमेव ज्ञानलक्षणसामान्यलक्षणयोर्भेद इति (भट्टाचार्यः, सन् २००३, कारिका ६५) ।

**योगजलक्षणप्रत्यासत्तिः**

अलौकिकसन्निकर्षेषु अयं सन्निकर्षस्तृतीयः । अस्य बलेन योगिनोऽतीतानागतानां देशान्तरस्थवस्तूनां प्रत्यक्षं कर्तुंप्रभवन्ति। यौगिकं सत्यन्तु अस्मद्देशे न केवलम् वैदिकदार्शनिकाः, अपितु अवैदिकबौद्धादयोऽपि स्वीकुर्वन्ति । योगिनः खलु स्वस्य योगसामर्थ्येन तपोबलेन वेन्द्रियार्थसन्निकर्षं विनाऽपि प्रत्यक्षं कर्तुं शक्नुवन्ति । योगसिद्धानां जनानां यौगिकशक्तेः प्राप्तिस्तु स्वतो भवति । पातञ्जलयोगदर्शने योगो नाम चित्तवृत्तेर्निरोधः। तथा च सूत्रम् "योगश्चित्तवृत्तिनिरोधः"(१।१।१)। योगजः सन्निकर्षो द्विविधो भवति, योगिनो युक्तयुञ्जानभेदात्। विश्वनाथपञ्चाननेनाऽपि उक्तं कारिकावल्यां यत् –

योगजो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः ।

युक्तस्य सर्वदा भानं चिन्तासहकृतोऽपरः ॥ (कारिका ६५-६६) ।

तत्र पूर्णयौगिकश्शक्तिसम्पन्नः पुरुषः सर्वदा सर्वप्रकारेण ज्ञानं स्वतः प्राप्नोति। अतो युक्त उच्यते। किन्तु यस्य यौगिकसिद्धिः आंशिका वर्तते, स युञ्जान उच्यते । युञ्जानयोगिनो यौगिकं सामर्थ्यं न स्वतः प्राप्नुवन्ति । किन्तु तस्य कृते मनननिदिध्यासनादीनामावश्यकं भवति । एवं प्रकारेण युक्तयुञ्जानभेदतो योगजो द्विविधः प्रोक्तः। युक्तयोगिनां योगबलेन तपोबलेन आकाशपरमाण्वादीनां सकलपदार्थानां ज्ञानं भवति चेद् युञ्जानयोगिनां धारणाध्यानमननादिभिः ज्ञानप्राप्तिर्भवति ।

एवं प्रकारेणालौकिकं प्रत्यक्षं त्रिविधम्, लौकिकप्रत्यक्षञ्च षड्विधम्। आहत्य च नवविधाः सन्निकर्षाः निरूपिताः । एतैः सन्निकर्षैर्जायमानं यज्ज्ञानं तत्प्रत्यक्षमित्युच्यते । तादृशप्रत्यक्षज्ञानस्य यत् करणं तत् प्रत्यक्षप्रमाणमित्यर्थः । तच्च चक्षुरादीन्द्रियम्, इन्द्रियार्थसन्निकर्षः, तज्जन्यं ज्ञानं वेति दिक् ।

## निष्कर्षः

एतावतानुसन्धानमूलकालेखेन निश्चीयते यत् - प्रमाणेषु ज्येष्ठं श्रेष्ठञ्चास्ति प्रत्यक्षम्, यतोहि लोके तद् विना न कस्यापि किमपि कार्यं सम्पद्यते । शास्त्रे च तथैव स्थितिः । अत एवान्येषामनुमानादीनां प्रमाणानामस्वीकर्ता चार्वाकोऽपि स्वसिद्धान्तस्थापनाय प्रत्यक्षमिदमेकं प्रमाणमङ्गीकरोति। अन्येऽपि सर्वे दार्शनिकाः प्रत्यक्षसहितान्येव अनुमानादीनि प्रमाणानि स्वीकुर्वन्ति । प्रत्यक्षं विनान्येषामनुमानादीनां प्रामाण्यमप्यसम्भवं भवति । एतादृशस्य प्रत्यक्षस्य प्रामाण्यञ्च इन्द्रियाणां विषयाणाञ्च मध्ये पारस्परिकसम्बन्धाधीनमस्ति । यदा चक्षुरादीन्द्रियाणां स्वस्वविषयेषु सम्बन्धो जायते तदैव प्रत्यक्षात्मिका प्रमा उत्पद्यते । यदा प्रमोत्पद्यते तदैवेन्द्रियादीनां प्रत्यक्षप्रमाणत्वं सिद्ध्यति । अतः सन्निकर्षापरपर्यायरूपविषयेन्द्रियसम्बन्धोऽत्र प्रमाजनने व्यापाररूपेण तिष्ठति । सन्निकर्षाख्यं व्यापारं विना न प्रत्यक्षप्रमा उत्पद्यते, न वेन्द्रियेषु प्रत्यक्षप्रमाणत्वञ्च सम्भवति । अत एवात्रालेखे न्यायदर्शनोक्तस्य प्रत्यक्षज्ञानकारणीभूतस्य लौकिकालौकिकभेदभिन्नस्य सन्निकर्षस्य स्वरूपं परिशीलितम् । न्यायदर्शने तत्समानतन्त्रभूते वैशेषिकदर्शने च प्रत्यक्षप्रमारूपं ज्ञानं तत्करणरूपं प्रत्यक्षप्रमाणञ्च सुविस्तृततया चिन्तितम् । एतच्चिन्तजनक्रमे नैयायिकैः प्रत्यक्षप्रमायाः जननार्थं संयोगादिषड्विधसन्निकर्षाणां योगजादिलक्षणरूपत्रिविधालौकिकसन्निकर्षाणाञ्च स्वरूपमपि चिन्तितम् । सुविस्तृते महति न्यायशास्त्रे तत्समानभूते वैशेषिके च दर्शने अयं विषयो यत्र तत्र विचारितो वर्तते । किन्तु बहुत्र प्रसृतानां सन्निकर्षविषयकाणां विभिन्नाचार्योक्तविविधमतानां नैकत्र संग्रहो नैवालोक्यते । कतिपयैरर्वाचीनैः विद्वद्भिः स्वरचितप्रकरणग्रन्थेषु अयं विषयः प्रत्यक्षप्रमाणविवेचनक्रमे प्रासङ्गिकतया प्रतिपादितो दृश्यते । किन्तु तत्रापि बहूनां विषयाणां समावेशात् विषयस्यैतन्मात्रस्य चिन्तनाभावाच्च जिज्ञासूनां मन्दमतीनां न्यायशास्त्रप्रविविक्षूणां बालानाञ्च एतत्स्वरूपनिर्धारणै क्लेशो दृष्टः । अतः सन्निकर्षमात्रस्य स्वरूपं सोदाहरणं लक्षणञ्च परिशील्य अस्य प्रत्यक्षप्रमोत्पत्तौ आवश्यकत्वमस्ति न वेति निर्धारितम् । एतच्चिन्तनक्रमे प्रासङ्गिकतया समागतानां प्रत्यक्षप्रमा-तत्करणीभूतप्रत्यक्षप्रमाणादीनां च स्वरूपं संक्षेपतः परिचायितमत्र । निष्कर्षतः प्रत्यक्षप्रमोत्पत्तौ संयोग-संयुक्तसमवाय-संयुक्तसमवेतसमवाय-समवाय-समवेतसमवाय-विशेषणविशेष्यभावरूपाणां षड्विधानां सन्निकर्षाणां तथैव क्वचित् सामान्यलक्षण-ज्ञानलक्षण-योगजरूपाणाञ्च त्रिविधानामलौकिकसन्निकर्षाणाञ्चात्यन्तमुपयोगिता वर्तते । न तैर्विना प्रत्यक्षप्रमा जायते, न वा प्रत्यक्षप्रमाणस्य च प्रमाणत्वं सिद्ध्यति । एतदेवात्रालेखे विभिन्नानामाचार्याणां मतानि प्रदर्श्य तद्विवेचनपुरस्सरं स्वकीयया सरलया गिरा निष्कर्षः स्थापितः । मन्ये अनेनानुसन्धानमूलकालेखेन सन्निकर्षविषयकयथार्थस्वरूपस्य ज्ञानार्थं समुत्सुकानां समेषां लाभो भवेदिति ।

### कृतज्ञता-ज्ञापनम्

आलेखेऽस्मिन् सन्निकर्षविषयविवेचनेऽनुसन्धानात्मकालेखसम्बद्धप्रविध्यादिविषये च परामर्श-प्रदायकेभ्यो विज्ञगुरुजनेभ्यो हार्दान् धन्यवादान् प्रयच्छामि ।

## सन्दर्भग्रन्थसूची

उद्योतकरः (२०६४). *न्यायवार्त्तिकम्* (सम्पा. अनन्तलालठक्कुरः). भारतीयदार्शनिकानुसन्धानपरिषद् ।

भट्टः, अन्नम् (सन् २००४). *तर्कसंग्रहः*. गोवर्धनसुधीकृतन्यायबोधिनीसंवलितः. कलाव्याख्या. आचार्यकेदारनाथत्रिपाठी. (पुनर्मुद्रणम्). मोतीलालवनारसीदासः ।

भट्टः, अन्नम् (सन् २००७). *तर्कसंग्रहः*. आलोकव्याख्यासहितः. व्याख्या. के.एस.वरदाचार्यः (द्वितीयसंस्करणम्). आर्षग्रन्थप्रकाशनम् ।

भट्टाचार्यः, विश्वनाथः (सन् २००३). *न्यायसिद्धान्तमुक्तावली.* किरणावलीव्याख्योपेता (व्याख्या. कृष्णवल्लभाचार्यः). चौखम्बासंस्कृतसंस्थानम् ।

मिश्रः, केशवः (सन् १९९०). *तर्कभाषा.* रहस्यदीपिकाव्याख्योपेता (व्या.आचार्यविश्वेश्वरसिद्धान्तशिरोमणि. चौखम्बासंस्कृतसंस्थानम् ।

मिश्रः, केशवः (सन् २००३). *तर्कभाषा.* हिन्दीव्याख्योपेता (सम्पा. गजाननशास्त्री मुसलगाँवकर). चौखम्बासुरभारतीप्रकाशनम् ।

मिश्रः, वाचस्पतिः (सन् २०१३). *न्यायवार्तिकतात्पर्यटीका* (सम्पा. राजेश्वर शास्त्री). चौखम्बासंस्कृतसंस्थान ।

वात्स्यायनः (२०५४). *न्यायभाष्यम्.* प्रसन्नपदाख्यटीकया संवलितम् (सम्पा. स्वामी द्वारिकादासशास्त्री).बौद्धभारती ।

शास्त्री, द्वारिकादासः (सम्पादकः) (सन् १९९८). *षड्दर्शनसूत्रसंग्रहः*. बौद्धभारती ।